শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে

# ॥ চতুর্নৱতিতমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ চতুর্নৱতিতমঃ সর্গঃ ॥

## রাক্ষসীনাং ৱিলাপঃ

তানি নাগসহস্রাণি সারোহাণি চ ৱাজিনাম্।
রথানাং ৎৱগ্নিৱর্ণানাং সধ্ৱজানাং সহস্রশঃ॥ **6.94.1** ॥

রাক্ষসানাং সহস্রাণি গদাপরিঘযোধিনাম্।
কাঞ্চনধ্ৱজচিত্রাণাং শূরাণাং কামরূপিণাম্॥ **6.94.2** ॥

নিহতানি শরৈর্দীপ্তৈস্তপ্তকাঞ্চনভূষণৈঃ।
রাৱণেন প্রযুক্তানি রামেণাক্লিষ্টকর্মণা॥ **6.94.3** ॥

দৃষ্টৱা শ্রুৎৱা চ সম্ভ্রান্তা হতশেষা নিশাচরাঃ।
রাক্ষস্যশ্চ সমাগম্য দীনাশ্চিন্তাপরিপ্লুতাঃ॥ **6.94.4** ॥

ৱিধৱা হতপুত্রাশ্চ ক্রোশন্ত্যো হতবান্ধৱাঃ।
রাক্ষস্যঃ সহ সঙ্গম্য দুঃখার্তাঃ পর্যদেৱযন্॥ **6.94.5** ॥

কথং শূর্পণখা ৱৃদ্ধা করালা নির্ণতোদরী।
আসসাদ ৱনে রামং কন্দর্পসমরূপিণম্॥ **6.94.6** ॥

সুকুমারং মহাসত্ত্বং সর্ৱভূতহিতে রতম্।
তং দৃষ্টৱা লোকৱধ্যা সা হীনরূপা প্রকামিতা॥ **6.94.7** ॥

কথং সর্ৱগুণৈর্হীনা গুণৱন্তং মহৌজসম্।
সুমুখং দুর্মুখী রামং কাময়ামাস রাক্ষসী॥ **6.94.8**॥

জনস্যাস্যাল্পভাগ্যৎৱাদ্ ৱলিনী শ্ৱেতমূর্ধজা।
অকার্যমপহাস্যং চ সর্ৱলোকৱিগর্হিতম্॥ **6.94.9**॥

রাক্ষসানাং ৱিনাশায় দূষণস্য খরস্য চ।
চকারাপ্রতিরূপা সা রাঘৱস্য প্রধর্ষণম্॥ **6.94.10**॥

তন্নিমিত্তমিদং ৱৈরং রাৱণেন কৃতং মহৎ।
ৱধায় সীতা সাহঽনীতা দশগ্রীৱেণ রক্ষসা॥ **6.94.11**॥

ন চ সীতাং দশগ্রীৱঃ প্রাপ্নোতি জনকাত্মজাম্।
বদ্ধং বলৱতা ৱৈরমক্ষয়ং রাঘৱেণ চ॥ **6.94.12**॥

ৱৈদেহীং প্রার্থয়ানং তং ৱিরাধং প্রেক্ষ্য রাক্ষসম্।
হতমেকেন রামেণ পর্যাপ্তং তন্নিদর্শনম্॥ **6.94.13**॥

চতুর্দশ সহস্রাণি রক্ষসাং ভীমকর্মণাম্।
নিহতানি জনস্থানে শরৈরগ্নিশিখোপমৈঃ॥ **6.94.14**॥

খরশ্চ নিহতঃ সঙ্খ্যে দূষণস্ত্রিশিরাস্তথা।
শরৈরাদিত্যসঙ্কাশৈঃ পর্যাপ্তং তন্নিদর্শনম্॥ **6.94.15**॥

হতো যোজনবাহুশ্চ কবন্ধো রুধিরাশনঃ।
ক্রোধান্নাদং নদন্ সোঽথ পর্যাপ্তং তন্নিদর্শনম্॥ **6.94.16**॥

জঘান বলিনং রামঃ সহস্রনয়নাত্মজম্।
ৱালিনং মেরুসঙ্কাশং পর্যাপ্তং তন্নিদর্শনম্॥ **6.94.17**॥

ঋষ্যমূকে ৱসংশ্চৈৱ দীনো ভগ্নমনোরথঃ।
সুগ্রীৱঃ প্রাপিতো রাজ্যং পর্যাপ্তং তন্নিদর্শনম্॥ **6.94.18**॥

ধর্মার্থসহিতং ৱাক্যং সর্ৱেষাং রক্ষসাং হিতম্।
যুক্তং ৱিভীষণেনোক্তং মোহাৎ তস্য ন রোচতে॥ **6.94.19**॥

ৱিভীষণৱচঃ কুর্যাদ্ যদি স্ম ধনদানুজঃ।
শ্মশানভূতা দুঃখার্তা নেযং লঙ্কা ভৱিষ্যতি॥ **6.94.20**॥

কুম্ভকর্ণং হতং শ্রুৎৱা রাঘৱেণ মহাবলম্।
অতিকাযং চ দুর্মর্ষং লক্ষ্মণেন হতং তদা।
প্রিযং চেন্দ্রজিতং পুত্রং রাৱণো নাৱবুধ্যতে॥ **6.94.21**॥

মম পুত্রো মম ভ্রাতা মম ভর্তা রণে হতঃ।
ইত্যেষ শ্রূযতে শব্দো রাক্ষসীনাং কুলে কুলে॥ **6.94.22**॥

রথাশ্ৱনাগাশ্চ হতাস্তত্র তত্র সহস্রশঃ।
রণে রামেণ শূরেণ হতাশ্চাপি পদাতযঃ॥ **6.94.23**॥

রুদ্রো ৱা যদি ৱা ৱিষ্ণুর্মহেন্দ্রো ৱা শতক্রতুঃ।
হন্তি নো রামরূপেণ যদি ৱা স্ৱযমন্তকঃ॥ **6.94.24**॥

হতপ্রৱীরা রামেণ নিরাশা জীৱিতে ৱযম্।
অপশ্যন্ত্যো ভযস্যান্তমনাথা ৱিলপামহে॥ **6.94.25**॥

রামহস্তাদ্ দশগ্রীৱঃ শূরো দত্তমহাৱরঃ।
ইদং ভযং মহাঘোরং সমুৎপন্নং ন বুদ্ধ্যতে॥ **6.94.26**॥

তং ন দেৱা ন গন্ধর্ৱা ন পিশাচা ন রাক্ষসাঃ।
উপসৃষ্টং পরিত্রাতুং শক্তা রামেণ সংযুগে॥ **6.94.27**॥

উৎপাতাশ্চাপি দৃশ্যন্তে রাৱণস্য রণে রণে।
কথযন্তি হি রামেণ রাৱণস্য নিবর্হণম্॥ **6.94.28**॥

পিতামহেন প্রীতেন দেৱদানৱরাক্ষসৈঃ।
রাৱণস্যাভযং দত্তং মনুষ্যেভ্যো ন যাচিতম্॥ **6.94.29** ॥

তদিদং মানুষং মন্যে প্রাপ্তং নিঃসংশযং ভযম্।
জীৱিতান্তকরং ঘোরং রক্ষসাং রাৱণস্য চ॥ **6.94.30** ॥

পীড্যমানাস্তু বলিনা ৱরদানেন রক্ষসা।
দীপ্তৈস্তপোভির্ৱিবুধাঃ পিতামহমপূজযন্॥ **6.94.31** ॥

দেৱতানাং হিতার্থায মহাত্মা ৱৈ পিতামহঃ।
উৱাচ দেৱতাস্তুষ্ট ইদং সর্ৱা মহদ্ৱচঃ॥ **6.94.32** ॥

অদ্যপ্রভৃতি লোকাংস্ত্রীন্ সর্ৱে দানৱরাক্ষসাঃ।
ভযেন প্রভৃতা নিত্যং ৱিচরিষ্যন্তি শাশ্ৱতম্॥ **6.94.33** ॥

দৈৱতৈস্তু সমাগম্য সর্ৱৈশ্চেন্দ্রপুরোগমৈঃ।
ৱৃষধ্ৱজস্ত্রিপুরহা মহাদেৱঃ প্রতোষিতঃ॥ **6.94.34** ॥

প্রসন্নস্তু মহাদেৱো দেৱানেতদ্ ৱচোঽব্রৱীৎ।
উৎপৎস্যতি হিতার্থং ৱো নারী রক্ষঃক্ষযাৱহা॥ **6.94.35** ॥

এষা দেৱৈঃ প্রযুক্তা তু ক্ষুদ্ যথা দানৱান্ পুরা।
ভক্ষযিষ্যতি নঃ সর্ৱান্ রাক্ষসঘ্নী সরাৱণান্॥ **6.94.36** ॥

রাৱণস্যাপনীতেন দুর্ৱিনীতস্য দুর্মতেঃ।
অযং নিষ্টানকো ঘোরঃ শোকেন সমভিপ্লুতঃ॥ **6.94.37** ॥

তং ন পশ্যামহে লোকে যো নঃ শরণদো ভৱেৎ।
রাঘৱেণোপসৃষ্টানাং কালেনেৱ যুগক্ষযে॥ **6.94.38** ॥

নাস্তি নঃ শরণং কিঞ্চিদ্ ভযে মহতি তিষ্ঠতাম্।
দাৱাগ্নিৱেষ্টিতানাং হি করেণূনাং যথা ৱনে॥ **6.94.39** ॥

প্রাপ্তকালং কৃতং তেন পৌলস্ত্যেন মহাত্মনা।
যত এৱ ভযং দৃষ্টং তমেৱ শরণং গতঃ॥ **6.94.40**॥

ইতীৱ সর্ৱা রজনীচরস্ত্রিযঃ
পরস্পরং সম্পরিরভ্য বাহুভিঃ।
ৱিষেদুরার্তাতিভযাভিপীডিতা
ৱিনেদুরুচ্চৈশ্চ তদা সুদারুণম্॥ **6.94.41**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে চতুর্নৱতিতমঃ সর্গঃ॥